# Shri Rinamochanamahaganapati Stotram

# શ્રીઋણમોચનમહાગણપતિસ્તોત્રમ્

## Document Information

Text title : Shri Rinamochanamahaganapati Stotram

File name : RRiNamochanamahAgaNapatistotraM.itx

Category : ganesha, stotra

Location : doc_ganesha

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2023

*sanskritdocuments.org*

# Shri Rinamochanamahaganapati Stotram

# શ્રીઋણમોચનમહાગણપતિસ્તોત્રમ્

અસ્ય શ્રીઋણમોચનમહાગણપતિસ્તોત્રસ્ય શુક્રાચાર્ય ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીઋણમોચક મહાગણપતિર્દેવતા ।
મમ ઋણમોચનમહાગણપતિપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

રક્તાઙ્ગં રક્તવસ્ત્રં સિતકુસુમગણૈઃ પૂજિતં રક્તગન્ધૈઃ
ક્ષીરાબ્ધૌ રત્નપીઠે સુરતરુવિમલે રત્નસિંહાસનસ્થમ્ ।
દોર્ભિઃ પાશાઙ્કુશેષ્ટાભયધરમતુલં ચન્દ્રમૌલિં ત્રિણેત્રં
ધ્યાયેત્ શાન્ત્યર્થમીશં ગણપતિમમલં શ્રીસમેતં પ્રસન્નમ્ ॥

સ્મરામિ દેવ દેવેશં વક્રતુણ્ડં મહાબલમ્ ।
ષડક્ષરં કૃપાસિન્ધું નમામિ ઋણમુક્તયે ॥ ૧॥

એકાક્ષરં હ્યેકદન્તમેકં બ્રહ્મ સનાતનમ્ ।
એકમેવાદ્વિતીયં ચ નમામિ ઋણમુક્તયે ॥ ૨॥

મહાગણપતિં દેવં મહાસત્વં મહાબલમ્ ।
મહાવિઘ્નહરં શમ્ભોઃ નમામિ ઋણમુક્તયે ॥ ૩॥

કૃષ્ણામ્બરં કૃષ્ણવર્ણં કૃષ્ણગન્ધાનુલેપનમ્ ।
કૃષ્ણસર્પોપવીતં ચ નમામિ ઋણમુક્તયે ॥ ૪॥

રક્તામ્બરં રક્તવર્ણં રક્તગન્ધાનુલેપનમ્ ।
રક્તપુષ્પપ્રિયં દેવં નમામિ ઋણમુક્તયે ॥ ૫॥

પીતામ્બરં પીતવર્ણં પીતગન્ધાનુલેપનમ્ ।
પીતપુષ્પપ્રિયં દેવં નમામિ ઋણમુક્તયે ॥ ૬॥

ધૂમ્રામ્બરં ધૂમ્રવર્ણં ધૂમ્રગન્ધાનુલેપનમ્ ।
હોમ ધૂમપ્રિયં દેવં નમામિ ઋણમુક્તયે ॥ ૭॥

ભાલનેત્રં ભાલચન્દ્રં પાશાઙ્કુશધરં વિભુમ્ ।

ચામરાલઙ્કૃતં દેવં નમામિ ઋણમુક્તયે ॥ ૮॥

ઇદં ત્વૃણહરં સ્તોત્રં સન્ધ્યાયાં યઃ પઠેન્નરઃ ।
ષણ્માસાભ્યન્તરેણૈવ ઋણમુક્તો ભવિષ્યતિ ॥ ૯॥

ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે શ્રીઋણમોચનમહાગણપતિસ્તોત્રં સમ્પૂર્ણમ્ ।
ઋણહરસ્તોત્રમ્

Proofread by Aruna Narayanan

---

*Shri Rinamochanamahaganapati Stotram*

pdf was typeset on December 28, 2023

Please send corrections to *sanskrit@cheerful.com*